# 2021

## SANSKRIT — GENERAL

### Paper : SEC-A-1

### Full Marks : 80

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**1.** (a) अधस्तनेषु ***द्वयोः*** संस्कृतभाषया देवनागरीलिप्या च अनुवादः कार्यः। 10×2

(i) There was a king in Ayodhyā, Parīkṣita by name. Once on hunting, he followed, a deer to the deep forest. Then tired and stricken with hunger and thirst, he looked for water here and there. After sometime, he found a very beautiful lake. The lake was transparent like clear sky. The king dipped into the lake with his horse and drank its excellent sweet water to his satisfaction.

(ii) Long ago, a lion lived in a forest. Everyday, he killed animals and ate them. The animals in the forest held a meeting. Every animal made a speech. At last the Chairperson spoke. He said, "The lion is our king. But he kills us everyday. From tomorrow, we will send one animal to him everyday."

(iii) The parrot began to narrate all the incidents about himself. "O king! I was born on the bank of a lake. My mother died at the very moment, when I was born. Then I was brought up by my father and was living in the hole of an old Śālmalī tree with him. One morning, a hunter came and killed my father".

(b) अधस्तनेषु ***द्वयोः*** मातृभाषया अनुवादः कार्यः। 10×2

(i) स्वार्थे प्रवर्तनं हि जीवानां स्वभावः। जगति दुर्लभा परार्थे प्रवृत्तिः। यः परार्थे प्रवर्तते स सत्पुरुषः। यथा मलयजं चन्दनं दाहे छेदने निघर्षणे च अन्येभ्यः सुगन्धं वितरति, तथा सत्पुरुषा अपि सक्लेशम् अविभणय्य परोपकारं साधयन्ति।

(ii) पुरा चिरायुर्नाम कश्चित् भूपतिरासीत्। तस्य नागार्जुनो नाम विज्ञानवान् मन्त्री बभूव। यः सर्वौषधिज्ञः राजानम् आत्मानं च विजरौ चिरजीवितौ च अकरोत्। कदाचित्तस्य नागार्जुनस्य सुतो बालोऽपि पञ्चत्वं गतः। शोकसन्तप्तः स मर्त्यानां मृत्युशान्तये अमृतं स्रष्टुम् उपचक्रमे।

(iii) तदा बोधिसत्त्वः प्रोवाच–राजन्, नाहं चौरः। एकदा मनसि मे सन्देह उपस्थितो यत्, शीलशास्त्रज्ञानयोः कतरम् श्रेयः। तत्सन्देह–निरसनार्थं स्वेच्छया द्वदं चौर्यकार्यमकरोत्। अधुना मया ज्ञातं यदिह जगति शीलमेव प्रशस्यतरमिति। राजापि एतदाकर्ण्य तस्य मुक्तिमादिदेश। बोधिसत्त्वोऽपि राज्ञोऽनुमतिं गृहीत्वा संसारं विहाय सन्न्यासग्रहणार्थं हिमालयं जगाम।

**2.** कश्चन ***एकतरम्*** अनुच्छेदं पठित्वा तदन्ते प्रदत्तानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 10×1

(a) युधिष्ठिरो नाम कुम्भकारः कदाचित् प्रमादात् अर्धमग्नकलसस्य उपरि महता वेगेन धावन् पतितः। तेन तस्य ललाटे क्षतं जातम्। अथ कदाचित् दुर्भिक्षपीड़िते देशे स कुम्भकारः क्षुत्क्षामकण्ठः देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव। स च राजा तस्य ललाटे प्रहारक्षतं दृष्ट्वा चिन्तयामास यत्, वीरपुरुषः कश्चिदयम्, नूनं तेन ललाटे अयं सम्मुखप्रहारः।

(i) कुम्भकारस्य नाम किम्? स कथं कुत्र पतितः?

(ii) कथं स देशान्तरं गत्वा कस्यचित् राज्ञः सेवकः अभवत्?

(iii) तस्य ललाटे क्षतं दृष्ट्वा राजा किं चिन्तयामास?

(b) ततः प्राते सर्वे यथाभिमतं देशं गताः। एकदा तेन जम्बुकेन सुनिभृतमुक्तम्—सखे मृगः। एतस्मिन् वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति। अहं त्वां नीत्वा दर्शयामि। तथाकृते सति मृगः प्रत्यह शस्यं खादति। क्षेत्रपतिना च तद् दृष्ट्वा पाशस्तत्र नियोजितः। अनन्तरं पुनरागतो मृगः पाशैर्वद्धोऽचिन्तयत्—को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः?

(i) प्रातः के यथाभिमतं देशं गताः?'

(ii) शृगालः मृगं सुनिभृतं किमवदत्?

(iii) मृगस्तदा किमकरोत्?

(iv) मृगः कथं पाशैर्बद्धोऽभवत्?

(v) पाशबद्धो मृगः किमचिन्तयत्?

**3.** अधोलिखितयो विषय***मेकमव***लम्ब्य यथानिर्देशं पत्रं विरच्यताम्— संस्कृतभाषया, देवनागरीलिप्या च। 10×1

(a) महाविद्यालयस्य प्राक्तनछात्रान् उद्दिश्य पुनर्मिलनोत्सवस्य आमन्त्रणपत्रमेकं लिख्यताम्।

(b) वन्यप्राणिसंरक्षणमधिकृत्य मित्रं प्रति पत्रमेकं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्।

**4.** अधोलिखितेषु विषय***मेकमव***लम्ब्य न्यूनतया पञ्चाशदधिकाष्टशतशब्दैः संस्कृतभाषया, देवनागरीलिप्या च प्रबन्धः विरच्यताम्। 20×1

(a) विश्वयोगदिवसः।

(b) छात्राणां कर्तव्यम्।

(c) तव प्रिय ऋतुः।

---